राम्लत्वम् । दाहप्रशमनत्वम् । वृष्यत्वम् । कषायत्वम् । कफनाशित्वञ्च । इति राजनिर्घण्टः ॥

तूलं, क्ली पुं, (तूल्यते इयत्तया परिच्छिद्यते इति । तूल + कर्म्मणि घञ् । यद्वा, तूलयते स्वल्पोऽपि बहुस्थानं पूरयतीति । तूल + "इगुपधेति ।" कः ।) कार्पासादितूलः । (इति मेदिनी । ले, २६ ॥) तत्पर्य्यायः । पिचुः २ । इत्यमरः । २।६।१०६ ॥ पिचुलः ३ पिचुतूलः ४ तूलपिचुः ५ । इत्यमरटीका ॥ पिचुतूलम् ६ । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । ५ । १० । ३६ ।
"विपरीतं यदा दैवं तृणं वज्रसमं भवेत् ।
विधिश्चेत् सुमुखः कामं कुलिशं तूलवत्तदा ॥")

तूलकं, क्ली, (तूल + स्वार्थे कन् ।) तूलः । इति हेमचन्द्रः । ४ । २० । ५ ॥

तूलकार्म्मुकं, क्ली, (तूलाय तूलस्फोटनाय कार्म्मुकमिव ।) तूलस्फोटनार्थधनुः । धुनखरा इति भाषा । तत्पर्य्यायः । पिञ्जलम् २ । इति त्रिकाण्डशेषः ॥

तूलचापः, पुं, (तूलाय तूलस्फोटनाय चाप इव ।) तूलकार्म्मुकम् । इति शब्दरत्नावली ॥

तूलनालिका, स्त्री, (तूलनिर्म्मिता नालिका नाली ।) पिञ्जिका । इति त्रिकाण्डशेषः ॥ पाँइज इति भाषा ॥

तूलनाली, स्त्री, (तूलनिर्म्मिता नाली ।) तूलनालिका । इति भूरिप्रयोगः ॥

तूलपिचुः, पुं, (तूलप्रधानः पिचुस्तूलवृक्षः ।) तूलः । इत्यमरटीकायां भरतः ॥

तूलवृक्षः, पुं, (तूलस्य तूलप्रधानो वा वृक्षः ।) शाल्मली । इति राजनिर्घण्टः ॥

तूलशर्करा, स्त्री, (तूलस्य शर्करेव ।) कार्पासवीजम् । इति शब्दमाला ॥

तूलसेचनं, क्ली, (तूलस्य सेचनम् ।) सूत्रकर्त्तनम् । इति शब्दमाला ॥ काटना इति भाषा ॥

तूला, स्त्री, (तूलयते पूरयति स्थानमिति । तूल + अच् + ततः स्त्रियां टाप् ।) कार्पासी । इति राजनिर्घण्टः ॥ वर्त्तिः । इति शब्दरत्नावली ॥

तूलिः, स्त्री, (तूलतीति । तूल निष्कर्षे + "इगुपधात् कित् ।" उणा । ४ । ११८ । इति इन् स च कित् ।) स्वनामख्यातचित्रकरोपकरणम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

तूलिका, स्त्री, (तूलिरेव । स्वार्थे कन् ।) चित्रकरोपकरणम् । तूली इति भाषा । (यथा, कुमारे । १ । ३२ ॥
"उन्मीलितं तूलिकयेव चित्रं
सूर्य्यांशुभिर्भिन्नमिवारविन्दम् ॥")
तत्पर्य्यायः । ईषिका २ । इत्यमरः । २।१०।३३॥ तुलिः ३ तूली ४ ईषीका ५ इषीका ६ । वीरणादिशलाका । इत्यन्ये । आवर्त्तितमनावर्त्तितं सुवर्णं ज्ञातुं यन्निक्षिप्यते तन्नेत्यन्ये । आवर्त्तितसुवर्णं द्रवाकारं यत्र निक्षिप्यते तन्नेति केचित् । इति भरतः ॥ (तूलमस्त्यस्या इति । तूल + ठन् ।) शय्योपकरणम् । इति मेदिनी । के, १०२ ॥ तोषक् इति भाषा । (यथा, कथासरित्सागरे । २६ । ७८ ।
"प्रविश्य चान्तः सद्रत्नपर्य्यङ्के न्यस्ततूलिके ।
पटावगुण्ठिततनुं शयानां काञ्चिदैक्षत ॥"
तथा च काशीखण्डे । ४ । ६७ ।
"कञ्चुकं तूलगर्भञ्च तूलिकां सूपवीतिकाम् ॥")
वर्त्तिः । इति शब्दरत्नावली ॥

तूलिनी, स्त्री, (तूलोऽस्त्यस्याः । तूल + इनिः । ङीप् ।) लक्ष्मणाकन्दः । इति राजनिर्घण्टः ॥ शाल्मलिवृक्षः । इति भावप्रकाशः ॥ (तद्यथा,
"ताम्बूलं कटुतैलसुष्णभवनं तूलीपटी तूलिनी ॥"
इति वैद्यकपथ्यापथ्यविधौ शिशिराद्याचारे ॥)

तूलिफला, स्त्री, (तूलि तूलयुक्तं फलमस्याः ।) शाल्मलिः । इति रत्नमाला ॥

तूली, स्त्री, (तूलयतीति । तूल + इन् कृदिकारादिति वा ङीप् ।) नीली । वर्त्तिः । इति शब्दरत्नावली ॥ तूलिका । इत्यमरटीकायां भरतः ॥ (यथा,—
"उच्चैस्तूलीविलासं सुललितशयनं प्राणिनामाभिरामम् ॥"
इति वैद्यकपथ्यापथ्यविधौ हेमन्तकृत्ये ॥)

तूवरः, पुं, (तु सौत्रो धातुः + बाहुलकात् ष्वरच् दीर्घश्च ।) काले अजातशृङ्गो गौः । नेड़ा गरु इति भाषा । अश्मश्रुपुरुषः । इत्यमरः । ३।३। १६४ ॥ माकुन्दिया इति भाषा । पुरुषव्यञ्जनत्यक्तः । कषायरसः । इति मेदिनी । रे, १६४ ॥

तूवरिका, स्त्री, (तूवरी + स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) तुवरिका । इत्यमरटीकायां रमानाथः ॥

तूवरी, स्त्री, (तूवर + षित्वात् ङीष् ।) आढ़की । सौराष्ट्रमृत्तिका । इत्यमरटीकायां भरतः ॥

तूष, तुष्टौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) षष्ठस्वरी । तूषन्ति कुलदेवताः । इति दुर्गादासः ॥

तूष्णीं, [म्] व्य, मौनम् । इत्यमरः । ३ । ४ । ६ ॥ (यथा, मनुः । ८ । १४७ ।
"यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी ।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥")

तूष्णींशीलः, त्रि, (तूष्णीं मौनं शीलं स्वभावो यस्य ।) मौनी । तत्पर्य्यायः । तूष्णीकः २ । इत्यमरः । ३ । १ । ३६ ॥

तूष्णीकः, त्रि, (तूष्णीं शीलं यस्य । "शीले को मलोपश्च ।" ५ । ३ । ७३ । इत्यस्य वार्त्तिकोक्त्या कः मलोपश्च ।) तूष्णींशीलः । इत्यमरः । ३।१।३६॥ (यथा, महाभारते । ५ । ३४ । २३ ।
"आसीनमपि तूष्णीकमनुरज्यन्ति तं प्रजाः ॥")

तूष्णीकां, [म्] व्य, (तूष्णीम् + अकच्प्रकरणे "तूष्णीमः काम् वक्तव्यः ।" इति वार्त्तिकोक्त्या काम् । मित्वादन्त्यादचः परः ।) मौनम् । इत्यमरः । ३ । ४ । ६ ॥

तूस्तं, क्ली, (तुस शब्दे + बाहुलकात् तुसेरपि तन् दीर्घश्च । इत्युज्ज्वलदत्तः । ३ । ८६ ।) धूलिः । ("तूस्तानि विनिहन्ति वितूस्तयति पन्थानं वातः ।" इति मुग्धबोधम् ॥) जटा । इति मेदिनी । ते, २२ ॥ पापम् । सूक्ष्मम् । इति शब्दरत्नावली ॥

तृक्ष, इत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) सप्तमस्वरी । तृक्षति । इत्यां गतौ । इति दुर्गादासः ॥

तृक्षं, क्ली, जातीफलम् । इति शब्दचन्द्रिका ॥

तृट्, [ष्] स्त्री, (तृष + क्विप् ।) इच्छा । तृष्णा । (यथा, ऋतुसंहारे ।१।११ ।
"मृगाः प्रचण्डातपतापिता भृशं
तृषा महत्या परिशुष्कतालवः ॥")
कामकन्या । इति मेदिनी । षे, १३ ॥

तृण, इ ञ उ भक्षे । इति कविकल्पद्रुमः ॥ (तनां-उभं-सकं-सेट् । क्त्वावेट् ।) इ ञ, तृणोति तर्णोति तृणुते तर्णुते । उ, तर्णित्वा तृत्वा । इति दुर्गादासः ॥

तृणं, क्ली, (तृण्यते भक्ष्यते गवादिभिरिति । तृण + घञ् । संज्ञापूर्व्वकत्वात् न गुणः । यद्वा, तृह हिंसायाम् + "तृहेः क्नो हलोपश्च ।" उणां ५।८। इति क्नप्रत्ययो हकारलोपश्च ।) नड़ादि । चिनाखड़ इति ख्यातम् । इति केचित् । इति भरतः ॥ तत्पर्य्यायः । अर्ज्जुनम् २ । इत्यमरः । २ । ५ । १६७ ॥ त्रिणम् ३ खटम् ४ खेट्टम् ५ हरितम् ६ ताण्डवम् ७ । इति शब्दरत्नावली ॥ * ॥ (यथा, पञ्चतन्त्रे । १ । ३४ ।
"जातस्य नदीकूले तस्य तृणस्यापि जन्म कल्याणम् । यत् सलिलमज्जनाकुलजनहस्तालम्बनं भवति ॥")
गोभ्यस्तृणदानफलं यथा,—
"तीर्थस्नानेषु यत् पुण्यं यत् पुण्यं विप्रभोजने ।
यत् पुण्यञ्च महादाने यत् पुण्यं हरिसेवने ॥
सर्व्वव्रतोपवासेषु सर्व्वेष्वेव तपःसु च ।
भुवः पर्य्यटने यत्तु सत्यवाक्येषु यद्भवेत् ॥
यत् पुण्यं सर्व्वयज्ञेषु दीक्षायाञ्च लभेन्नरः ।
तत् पुण्यं लभते प्राज्ञो गोभ्यो दत्त्वा तृणानि च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥ * ॥
धनिष्ठादिपञ्चनक्षत्रेषु गृहनिमित्ततृणकाष्ठाहरणे दोषा यथा,—
"अग्निचौरभयं रोगो राजपीड़ा धनक्षतिः ।
संग्रहे तृणकाष्ठानां कृते वस्वादिपञ्चके ॥"
इति ज्योतिःसारसंग्रहः ॥
(गन्धद्रव्यविशेषः । रामकर्पूर इति भाषा ॥ अस्य पर्य्याया यथा,—
"कुटूणञ्च सुगन्धञ्च तृणं शीतं सुशीतलम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

तृणकुङ्कुमं, क्ली, (तृणसम्भूतं कुङ्कुमम् ।) सुगन्धद्रव्यभेदः । तत्पर्य्यायः । तृणाढ्यक् २ गन्धि ३ तृणशोणितम् ४ तृणपुष्पम् ५ गन्धाधिकम् ६ तृणोत्थम् ७ तृणगौरम् ८ लोहितम् ९ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफमारुतशोफकण्डूतिपामाकुष्ठामदोषनाशित्वम् । परमभास्वरत्वम् । इति राजनिर्घण्टः ॥